अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ..........................

Paper Code
MAS-305

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – दिसम्बरमासः – 2018**

**एम.ए. संस्कृतम्, (सत्रम् : तृतीयसत्रम)**
**महाकाव्य एवं खण्डकाव्य**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

**1.** अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।
न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्च्छति मारुतस्य।।
उपर्युक्तश्लोकस्य सप्रसंगव्याख्यां करोतु।

**2.** रथाङ्गपाणे पटलेन रोचिषाम् ऋषित्विषः संवलिता विरेजिरे।
चलत्पलाशान्तरगोचरास्तरोः तुषारमूर्तेरिव नक्तमंशवः।।
उपर्युक्तश्लोकस्य ससन्दर्भव्याख्यां करोतु।

**3.** अपमन्युस्ततो वाक्यं पौलस्त्यो राममुक्तवान्।
अशोच्योऽपि ब्रजन्नस्तं सनाभिर्दुनुयान् न किम्।।
उपर्युक्तश्लोकस्य सप्रसंगव्याख्यां लिखतु।

**4.** 'मेघे माघे गतं वयः' सूक्तिमभिलक्ष्य सविस्तरं विवेचनं करोतु।

**5.** भवादृशेषु प्रमदाजनोचितं
भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारी समया दुराधयः।।
उपर्युक्तश्लोकस्य व्याख्यां करोतु।

## खण्डः ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवल चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. शिशुपालस्य चरित्रस्य वर्णनं करोतु।
2. 'उपमा कालिदासस्य' सूक्तिमभिलक्ष्य वर्णनं करोतु।
3. 'अहो दुरन्ता बलवद्विरोधिता' अस्याः सूक्तेः सप्रसंगव्याख्यां लिखतु।
4. भट्टिकाव्यस्य एकोनविंशस्य सर्गस्य सार लिखतु ?
5. शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ............ स्पष्टं करोतु।
6. 'किमस्ति कार्यं गुरु योगिनामपि' सूक्तिं सप्रसंगव्याख्यां लिखतु।

## खण्डः ग

## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×0.5=05)**

1. शिशुपालवधस्य सर्गसंख्या भवति ..................
   (अ) एकोनविंशतिः (ब) द्वादश
   (स) दश (द) विंशतिः
2. शिशुपालवधकाव्यस्य कः प्रधानरसः ?
   (अ) शृंगारः (ब) वीरः
   (स) बीभत्सः (द) करुणः
3. रघुवंशे कति राज्ञां वर्णनं दरीदृश्यते ?
   (अ) पञ्चविंशतः (ब) पञ्चाशतः
   (स) एकत्रिंशतः (द) अष्टादशानाम्
4. 'किरातार्जुनीयम्' काव्यस्य उपजीव्यकाव्यमस्ति ........
   (अ) महाभारतम् (ब) अभिज्ञानशाकुन्तलम्
   (स) रामायणम् (द) पुराणम्
5. महाकाव्ये कीदृशः नायकः भवति ?
   (अ) धीरोदात्तः (ब) धीरोद्धतः
   (स) धीरललितः (द) धीरप्रशान्तः
6. भट्टिकाव्ये कति सर्गाः सन्ति ?
   (अ) द्वाविंशतिः (ब) दश
   (स) षोडश (द) षष्टिः
7. रामः अङ्गुष्ठेन कुत्र अलिखत् ?
   (अ) पृथिव्याम् (ब) सागरे
   (स) नभसि (द) पाताले
8. अशोकवने सीताया हितैषिणी राक्षसी का ?
   (अ) पूतना (ब) शूर्पणखा
   (स) त्रिजटा (द) कालजिह्वा
9. रघुवंशे रघोः पुत्रः कः ?
   (अ) दिलीपः (ब) दशरथः
   (स) नलः (द) अजः
10. भारविः प्रसिद्धोऽस्ति ...............
    (अ) दीपशिखायै (ब) अर्थगौरवाय
    (स) उपमायै (द) श्लेषालङ्काराय

---------------x---------------